


**This device is called Braille Interpoint Slate. Visually challenged people can write the text in Braille with the help of this device and then read it. There is total 27 lines in this braille slate, 30 cells in each line, 6 dots in each cell. About the Braille script: total 64 characters can be produced based on the various combinations of these 6 dots. According to these combinations each letter has assigned a specific code. Visually challenged people remember these codes and make dots with their help. After attaching paper like a card sheet to the slate, using a writing pen called stylus, they write from right to left making dots. The paper is then taken out and read from left to right by touching the raised dots. Here the visually impaired can read Braille text by finding letters by recognizing subtle differences based on the direction of the dots. In Braille script, only 64 letter combinations are possible. So, this script is more convenient for writing the words of foreign languages like English. However, the words of all Indian languages in the Multiple letter system can be read and written in Braille by the visually impaired. Therefore, even the text of Sanskrit language can be written and read by the visually impaired very easily and taught to others with help of braille script.**

**एतत् साधनं ब्रेल इन्टरपाय्ण्ट् स्लेट् इति वदन्ति। दृष्टिविकलाः जनाः अस्य यन्त्रस्य साहाय्येन ब्रेल् लिप्यां पठ्यं लिखित्वा ततः पठितुं शक्नुवन्ति । अस्मिन् ब्रेल स्लेट् मध्ये आहत्य २७ रेखाः, प्रत्येकस्यां पङ्क्तौ ३० कोषाः, प्रत्येकस्मिन् कोषे ६ छिद्राणि भवन्ति। ब्रेल् लिप्याः विषये वक्तव्यञ्चेत्, एतेषां ६ छिद्राणां विविधसंयोजनानां कारणेन आहत्य ६४ वर्णाः उत्पद्यन्ते। एतेषां संयोजनानाम् अनुसारं प्रत्येकम् अक्षरं प्रति काचित् विशिष्टा सङ्ख्या निर्धारिता भवति। दृष्टिविकला जनाः एताः सङ्ख्याः कण्ठस्थाः कृत्वा पश्चात् तेषां साहाय्येन ब्रेल् अक्षराणि लिखन्ति।**

**इत्थं दृष्टिविकलाः पत्तकपत्रसदृशं पत्रं स्लेट् मध्ये योजयित्वा, स्टाइलस् इति नामिकायाः लेखन्याः साहाय्येन स्लेट् इत्यस्य दक्षिणतः वामपर्यन्तं छिद्राणि उत्पादयन्तः लिखन्ति । ततः तत्पत्रं बहिः निष्कास्य वामतः दक्षिणं यावत् उत्पन्नछिद्राणि स्पृष्ट्वा पठ्यं पठन्ति। एवं क्रमेण छिद्राणां तत्तत्स्थानाधारितं सूक्ष्मभेदं ज्ञात्वा दृष्टिविकलाः अक्षराणां परिचयं प्राप्य पाठ्यांशं पठितुं शक्नुवन्ति।**

**वस्तुतः ब्रेल् इति लिप्यां केवलं ६४ अक्षरसंयोजनानि सम्भवन्ति । अतः आंग्लसदृशविदेशीयभाषायाः शब्दलेखनार्थं एषा लिपिः अधिका अनुकूला। तथापि गुणितवर्णक्रमेण सर्वासु भारतीयभाषासु विद्यमानान् शब्दान् दृष्टिविकलाः ब्रेल् लिपिमाध्यमेन पठितुं लिखितुं च शक्नुवन्ति। अतः संस्कृतभाषायां विद्यमानानपि शब्दान् अत्यन्तसुलभतया दृष्टिविकलाः लिखितुं पठितुं च शक्नुवन्ति, तदुपयुज्य अन्येभ्यः पाठयितुमपि शक्नुवन्ति।**